अङ्क-२७
जनवरी-जून २०१६

**वेदविद्या**
ISSN-2230-8962

# अथ व्यञ्जनाविचारः

**डॉ. रामनारायण द्विवेदी**

लोके मानवानां हानोपादानात्मकप्रवृत्तयो दृश्यन्ते । प्रवृत्तिश्च ज्ञानपूर्विका, तथा चोक्तं तद्विषयकज्ञानं प्रति व्यवहर्तव्यज्ञानं कारणं भवति, ज्ञानं च प्रमाणाधीनं, प्रमाणानि च चत्वारि प्रत्यक्षानुमानोपमानशब्दाः इत्युक्तेः; तेषु शब्दस्य मुख्यं प्रामाण्यं शब्दस्य प्रत्यक्षाद्यविषयेऽपि शब्दस्य उपयोगात् भाष्यकारोऽपि वदति यच्छब्द् आह तदस्माकं प्रमाणं शब्दप्रमाणका वयम् इति। शब्देन स्वरूपतो ज्ञानं न जायते किन्तु तन्निष्ठवृत्तिज्ञानेन, अत एव उच्यते घटपदात् पटबोधवारणाय तद्विषयक शाब्दबुद्धित्वावच्छिन्नं प्रति तन्निष्ठवृत्तिज्ञानं कारणम् अत एव घटपदेन पटबोधो न जायते । घटे पटार्थनिरूपितवृत्तेरभावात्, अत एव वृत्तिपदार्थः अवश्यमेव बोधव्यः । पदस्य पदार्थेन शाब्दबोधानुकूलः कश्चन सम्बन्धः वृत्तिपदेनोच्यते, अत एव वाक्यपदीये उक्तम् -

**सति प्रत्ययहेतुत्वं सम्बन्धोऽस्तीति गम्यते ।**
**तस्मात् तदर्थैः शब्दानां सम्बन्धोऽस्तीति गम्यते॥** [१]

अतः शाब्दबोधानुकूलपदपदार्थज्ञानजनकज्ञानविषयः पदपदार्थयोः सम्बन्धविशेष एव वृत्तिः भाष्यकारसम्मतमपि इदं वृत्तिलक्षणं तथा हि **हलोऽनन्तराः संयोग** इति सूत्रे ग्रामशब्दोऽयं बह्वर्थः अस्त्येव शालासमुदाये वर्तते, तद्यथा ग्रामो दग्ध इति तदयः सारण्यके सशीमके सस्थण्डलिके वर्तते तमभिसमीक्ष्यैतत् प्रयुज्यते अनन्तरौ इमौ ग्रामौ इत्युक्तम् अत्र अस्त्येव शालासमुदाये वर्तते इति वाक्ये वर्तते इति पदस्य वृत्तिरित्यर्थः लडर्थस्याविवक्षणात्। धातुमात्रार्थो विवक्षितः, अन्यथा अस्-धातुउपादानम् अनर्थकं स्यात्। तथा च अस्ति शालासमुदाये ग्रामशब्दवृत्तिः इत्यर्थः समुदायार्थो जातः। उद्योतकारेणापि व्याख्यातोऽयम् अर्थः अनेन प्रघट्टकेन पदपदार्थयोर्वृत्तिनामकः कश्चिन्विलक्षणः सम्बन्धोऽस्तीति सिद्यति तद्यः सारण्यके सशीमके तमभिसमीक्ष इति कथनेन पदज्ञानस्य पदनिष्ठवृत्तिज्ञानस्य च शाब्दबोधे कारणता ध्वनितावृत्तिः सम्बन्धरूपा। अत एव एकसम्बन्धि ज्ञानमपरसम्बन्धिस्मारकमिति विधया पदस्य श्रावणप्रत्यक्षे सति अर्थनिरूपितवृत्त्याख्यसम्बन्धेन सम्बन्धिनोरर्थस्य स्मरणमिति वृत्तिज्ञानस्य हेतुत्वं निर्वहति। एवं च न्यायमते वृत्तिस्वरूपं शाब्दिकमते तस्य खण्डनं शक्तिवादे श्रीगदाधरभट्टाचार्येण सेतो लक्षणा चार्थे पदवृत्तिरित्युक्तम् तेन चेदमेव प्रतीयते

---

[१] वा. ३/३/३७

यत् शक्तिलक्षणान्यतरत्वम् इत्येव वृत्तिलक्षणम्। अन्यथा वृत्तिसामान्यलक्षणानुक्तौ विशेषलक्षणानवसर एव स्यात्। तत्र टीकायां श्रीहरिनाथभट्टाचार्येण तु शाब्दनिरूपिता या स्मृतित्वावच्छिन्ना जनकता तन्निरूपिता व्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकता निरूपितावच्छेदकतावत्सांसर्गिकविषयतावत्वं वृत्तित्वम् इति रूपेण लक्षणं परिष्कृतम्।[२]

तदेतद्द्वयमपि शाब्दिकानामसम्मतम्। लक्षणायाः अस्वीकारात् प्रथमस्य। वृत्तित्वज्ञाने एतद् घटककार्यकारणभावज्ञानम्, तज्ज्ञाने चोक्तवृत्तित्वज्ञानम् इत्यन्योन्याश्रयदोषेण, व्यापारत्वाऽभावोपपादकेन नव्यानाम्मतेन च द्वितीयस्याऽपि असम्भवात्। सा चेयं वृत्तिस्त्रिधा शक्तिर्लक्षणाव्यञ्जना चेति। यद्यपि वैयाकरणमते लक्षणाया अतिरिक्तवृत्तित्वं नास्ति कार्यकारणभावे गौरवात् तथापि परमतेनेदं त्रैविध्यं मञ्जूषादौ उक्तम्। किन्तु प्रसिद्धा अप्रसिद्धा भेदेन शक्तिं स्वीकृत्य लक्षणास्थले अप्रसिद्धाशक्तिं स्वीकृत्य लक्षणायाः विषय अप्रसिद्धशक्त्यैव स्वीकृता तथा च आपामर विद्वज्जनवेद्यात्वं प्रसिद्धात्वम्, सहृदयमात्रवेद्यात्वम् अप्रसिद्धात्वम् इतिस्वीकृत्य लक्षणास्थलीयो विषयः शक्त्यैव गतार्थीकृता किन्तु शक्तिस्तु स्वीकृता तथा चोक्तं -

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा॥**[३]

इति कारिकया बोधजनकतारूपां योग्यतामेव शब्दनिष्ठाशक्तिं स्वीकृतवान् श्रीभर्तृहरिः। श्रीभट्टोजीदीक्षित श्रीकौण्डभट्टप्रभृतयो वैयाकरणशिरोमणयः इदमेव मतं समर्थयन्ति। शाब्दिकप्रवराः श्रीशेखरकारस्तु गम्भीरोचितयुक्तिभिः बोधजनकत्वस्य द्विष्ठत्वाभावेन सम्बन्धत्वमेवासम्भावयन्, शब्दार्थोभयनिष्ठं वाच्यवाचकभावलक्षणं सम्बन्धं शक्तिरूपत्वेन स्वीकृत्य उक्तस्य तादात्म्यतद्योतकत्वं समर्थितवन्तः। वैयाकरणमते व्यञ्जनावृत्तेः स्वीकारः कृतो वर्तते, तथा हि गङ्गायां घोषः इति वाक्यप्रयोगे गङ्गापदं भगीरथखातावच्छिन्नजलप्रवाहे शक्तम्। प्रवाहे घोषाधिकरणता अनुपपन्ना अतः गङ्गापदस्य तीरे लक्षणा तीरे घोषाधिकरणता हि उपपद्यते किन्तु वक्त्रा सर्वसौलभ्येन तीरे घोषः इति नोच्चार्यते किन्तु गङ्गायाम् इति उच्चारयतु तस्य अयमभिप्रायः तीरे घोषः इत्युक्तौ शैत्यपावनत्वादिप्रतीतिः न स्यात् अतः तीरे घोषः इति अनुक्त्वा गङ्गायां घोष इति वदति तथोक्तौ गङ्गागतं शैत्यपावनत्वादिकं तीरे प्रतीयते तच्च शैत्यपावनत्वादिकं नाभिधया नापि लक्षणया प्रत्याययितुं शक्यते तत् प्रतीतये व्यञ्जनावृत्तेः आवश्यकता न च व्यञ्जनाविषये लक्षणावृत्या निर्वाहः तथा च शैत्यपावनत्वादिविशिष्टं तीरं लक्ष्यताम् अतः लक्षणया तत् प्रतीतौ सिद्धायां व्यञ्जनायाः नास्ति उपयोग इति वाच्यम् अत्रोच्यते। एतदर्थं काव्यप्रकाशग्रन्थे उक्तं ज्ञानस्य विषयो हि अन्यत् फलमन्यत् उदाहृतम्। तस्य अयमभिप्रायः लक्षणया तीरज्ञानेन चरितार्था

[२] शा.वा. हरि. टीका.
[३] वा. ३/३/२९

फलबोधने असमर्थेति शैत्यपावनत्वादिप्रतीतये व्यञ्जनाया आवश्यकता एषा च शक्तिभिन्ना लक्षणाभिन्ना च अत एव मम्मटाचार्येणोक्तम्।

**प्रयोजनेन सहितं लक्षणीयं न विद्यते, ज्ञानस्य विषयो हि अन्यत् फलमन्यदुदाहृतम् इति॥**[४]
पूर्वोक्तप्रकारेण व्यञ्जनाशक्तिः वैयाकरणानां मते अवश्यमेष्टव्या। सा त्रिविधापि वृत्तिः शब्दे तिष्ठति शक्त्या श्रयत्वान्यथानुपपत्त्या, स्फोटश्चैषाम्मते स्वीक्रियते, तादृश शब्द एव प्रमाणम्।

एवञ्च लघुमञ्जूषायां श्रीनागोजिभट्टेनैतद्विचारावसरे संस्कारविशेषो व्यञ्जनासंस्कारे विशेषश्च त्रिविधः इत्युक्तम्। तथा हि यथा लक्षणायाः मुख्यार्थबाधग्रहपूर्वकत्वमेव बोधो जन्यते तथात्र न भवति अपि तु मुख्यार्थस्य बाधोऽस्तु न वास्तु अनया तु बोधः क्रियत एवेति मुख्यार्थबाधनिरपेक्षबोधजनकत्वं संस्कारे प्रथमं विशेषणम्। लक्षणायां तु मुख्यार्थसम्बन्धस्यैव अप्रसिद्धस्यैव बोधः क्रियते अनया तु अन्यथापि क्रियते एवेति मुख्यार्थसम्बन्धासम्बद्धसाधारणप्रसिद्धाऽप्रसिद्धार्थविषयकत्वमुक्तसंस्कारे द्वितीयो विशेषः उक्तसंस्कारस्योद्बुद्धानुद्बुद्धत्वसाधारण्येन सर्वत्रैव सर्वेषामनया बोधः स्यादिति दोषवारणाय वाक्यादिवैशिष्ट्यैव ज्ञानस्य एतज्जन्यबोधे सहकारित्वं स्वीक्रियते, इति वक्त्रादिवैशिष्ट्यज्ञान-प्रतिभाद्युद्बुद्धत्वमपि तत्र तृतीयो विशेषः।

व्यञ्जनायाः संस्काररूपत्वे, न्यायमते समवायेनात्मनिष्ठत्वे वेदान्तिमते तादात्म्येनान्तः-करणनिष्ठत्वेन द्विष्ठत्वाभावेन सम्बन्धत्वासम्भवेनास्याः वृत्तित्वं न स्यादिति चेदत्रोच्यते - व्यङ्ग्यव्यञ्जकभावसम्बन्धरूपैवात्र व्यञ्जनासम्मता। संस्कारविशेषस्तु तस्य ज्ञापकः। ज्ञापकहेतौ तस्मिन् व्यञ्जनापदव्यवहारो लाक्षणिकः। वैयाकरणलघुसिद्धान्तमञ्जूषायाम् इदमेवाह। द्योतकत्वं क्वचिद् समभिव्याहृतपदीयशक्त्यभिव्यञ्जकत्वम्। अनेन मञ्जूषाग्रन्थेन व्यङ्ग्यव्यञ्जकभावरूपस्य सम्बन्धस्यैव व्यञ्जनात्वं प्रतीयते। व्यञ्जनास्वीकारे प्रमाणम् अर्कोऽयमस्तङ्गतः इत्यादि वाक्यतः मया सन्ध्योपासनं विधेयम् इत्यादि द्वितीयार्थबोधसिद्धये वाक्यपदादौ वा स्वीक्रियमाणशब्दतदर्थयोर्द्योत्य-द्योतकभावसम्बन्धरूपा व्यङ्ग्यव्यञ्जकभावरूपा शक्तितो लक्षणातो वा भिन्ना व्यञ्जनानाम्नीवृत्तिः स्वीक्रियते इयं व्याकरणशास्त्रप्राणभूतैवास्ति। एनामन्तरा व्याकरणसिद्धान्तभूतस्फोटस्वरूपस्य प्रद्योतनमेव न स्यात्।

उक्तमेतद्विषये व्याडिना आचार्यप्रवरेण -

**शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।**
**स्थितिभेदे निमित्तत्वं, वैकृतः प्रतिपद्यते ॥**[५]

---

[४] का.प्र.उदा.
[५] व्या. आ.

श्रीभर्तृहरिणापि एतद्विषये उक्तम् -

**प्रत्येकं व्यञ्जका वर्णाः भिन्ना वाक्यपदेषु ये॥**

पूर्वोक्तप्रकारेण ध्वनिना स्फोटो व्यज्यते इति व्यवहारेण च ध्वनिनिष्ठा वर्णनिष्ठा। चैषा कथं बोधकशब्दनिष्ठापि इति शङ्कायाम् उच्यते - उपसर्गाः क्रियायोगे इति सूत्रे बोधकशब्दनिष्ठतयापि एषा प्रतीयते। स्फोटद्योतकध्वनिषु स्फोटव्यञ्जकतया लौकिकाद्यर्थद्योतिका गङ्गादिशब्दनिष्ठापि आरोपित्वं न द्योत्यम् इति ब्रुवाणेन भूषणकारेण शब्दनिष्ठतया एषा स्वीकृता।

व्यञ्जनायाः स्वीकारे कश्चन विशेषो लिख्यते तथाहि अयं भावः यत्र पूर्वमुख्यार्थस्य बाधो भवति तत्रैव लक्ष्यार्थबोधाय लक्षणा प्रवर्ततेऽत्र तु मुख्यार्थबाधाभावेऽपि विशेषार्थबोधो दृश्यते तदर्थं व्यञ्जनाऽऽवश्यकी। अपि च शक्यार्थसम्बन्धो लक्षणेत्यनुसारं मुख्यार्थेन सम्बद्धस्यार्थस्यैव बोधो लक्षणया, व्यञ्जना तु सर्वथा सम्बद्धोऽप्यर्थो बोध्यते इति लक्षणया व्यञ्जनाया न गतार्थत्वमिति बोध्यम्। अर्थनिष्ठापि व्यञ्जनेति प्रामाणिकः। तथा हि -

**रतिकाले विलोक्य श्रीर्नाभिपत्रे पितामहम्।**
**रत्याकुलाच्छादयते दक्षिणं नयनं हरेः ॥**[६]

इत्यादौ हरिपदेन दक्षिणनेत्रस्य सूर्यात्मकत्वं तत्सङ्कोचेन सूर्यास्तेन पद्मसङ्कोचस्तेन पितामहस्य स्थगनं तेनाप्रतिषिद्धरतिविलसितमिति क्रमेण व्यङ्ग्येषु प्रतीयमानेषु तदर्थानां प्रतीतेरनन्तरमेव व्यङ्ग्यार्थप्रतीतेरर्थस्यापि व्यञ्जकत्वस्य आवश्यकत्वात्।

**पश्यात्र नलिनीपत्रे बलाका दृश्यतेऽचला।**
**रम्ये मारकते पात्रे शुक्तिकेव च निर्मला॥**[७]

इत्यत्रापि वक्तृतात्पर्यविषयीभूतस्य वाच्यार्थस्य बाधाभावेऽपि तज्ज्ञानाभावेऽपि शुक्त्युपमया चात्रास्तत्वम् तेन तस्य निर्जनत्वम्, तेन तदेनावयोः सङ्केतस्थानमित्यादिक्रमेण तत्तदर्थव्यङ्ग्यप्रतीतेः मुख्यार्थबाधज्ञानसत्वे तदप्रतीतेश्च। पदस्य च स्वार्थबोधने उपरतत्वात् पुनः पुनरनुसन्धाने गौरवं तदननुभवात्। किञ्च गतोऽस्तमर्क इत्यादौ शिष्येण सन्ध्यावन्दनादेः कर्तव्यत्वाशयेन गुरुं प्रति प्रयुक्ताद् वक्तृतात्पर्याभावेऽपि प्रतिवेश्यादीनामभिसरणोपक्रमादिबोधस्य वाच्यार्थधीपूर्वकस्य वाच्यार्थबाधज्ञाने अजायमानस्य लक्षणयोपपादपितुमशक्यत्वाच्च। ननु गतोस्तमर्क इत्यादौ एकसम्बन्धिदर्शनाद-परसम्बन्धिस्मरणमितिवदुपपत्तिसम्भवान्नैतदर्थं व्यञ्जना आवश्यकीति चेन्न, गतोस्तमर्कः इत्यादि श्रवणोत्तरं सन्ध्यावन्दनकर्तव्यत्वं मया स्मृतीत्यनुव्यवसायाभावात् तत्तानुलेखनात्। इदं पदमेतदर्थस्य न

---

[६] का.प्र. उदा. १३७
[७] गाथासप्तशती

वाचकं नापि लक्षणं नापि स्मारकं अपितु व्यञ्जनया बोधकमिति प्रामाणिकव्यवहारेणाप्यतिरिक्ततत्सिद्धेः असम्बद्धस्याप्यर्थस्य व्यङ्ग्यत्वाच्च लक्षणाऽगतार्थत्वम्। व्यङ्ग्योऽर्थोऽनुमेय इत्यस्य त्वयुक्तत्या काव्यप्रकाशादौ निरूपिता, विरुद्धानैकान्तिकादिभ्यः व्याप्तिपक्षधर्मतादिनिर्णयाभावेऽपि व्यङ्ग्यार्थप्रतीतिरधोलिखितपद्ये प्रतिपादिता च।

**भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन।**
**गोदावरीकच्छकुञ्जवासिना दृप्तसिंहेन** ॥[८]

एवञ्चातिरिक्तव्यञ्जनावृत्त्यनङ्गीकारे न निर्वाह इति दिक्॥

**डॉ. रामनारायण द्विवेदी**
एसोशियेट प्रोफेसरः, व्याकरणविभागः
श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्
कटवारिया सराय, नवदेहली

[८] गाथासप्तशती २.७५